# वाटिकाविधाने ज्योतिषस्य उपादेयता

डॉ.उमाकान्ततिवारी
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्
ukshandilya43@gmail.com

## सारांशः

वाटिकाविधानम् अथवा उपवनविधानम् एकं महत्त्वपूर्णं सामाजिकं कर्म भवति। भारतीयधर्मशास्त्रे एतत् पूर्त्तकर्मसु एकं भवति। वाटिकायाः अथवा उपवनस्य शोभाः विभिन्न-प्रकारकैः पादपैः भवति, ते पादपाः यथोचिते काले रोपणेन एवं च यथाकालं तेषां सेचनेन ते संवर्धिताः सन्तः यथाकालं फलपुष्पादिभिः समन्विताः भवन्ति इत्यतः वाटिकाविधानसमये अथवा उपवनविधानसमये कालस्य विचारः अवश्यं करणीयः भवति। कालस्य बोधनार्थम् एव ज्योतिषशास्त्रं प्रवर्तितम्।

## प्रस्तावना

ज्योतिषशास्त्रं कालविधानशास्त्रम् अस्ति। वैदिककर्मणां सम्पादनार्थम् उचितानुचितयोः कालयोः बोधनार्थम् एव ज्योतिषशास्त्रस्य प्रवर्तनं जातम्। यतोहि वैदैः अभिहितं कर्म कालाधारितं भवति, कालभेदाः तु ग्रहाधारिताः एव भवन्ति, एतेषां ग्रहाणां गत्यादीनां बोधकं शास्त्रं ज्योतिषशास्त्रम् इति, अत एव ज्योतिषशास्त्रमिदं कालबोधकशास्त्ररूपेण प्रसिद्धम्। वेदाङ्गज्योतिषे निर्दिष्टं वर्तते यत् –

**कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।**
**ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः॥**
**विप्राणां सम्मितं लोके यज्ञकालार्थसिद्धये॥** *(वेदाङ्गज्योतिषम्, श्लो. -२, ३)*

वेदविहितयज्ञादीनां निमित्तम् उचितकालस्य निदर्शनादेव अस्य ज्योतिषशास्त्रस्य वेदाङ्गत्वं सिद्ध्यति। कथ्यते हि –
**वेदा हि यज्ञार्थमभिप्रवृत्ताः, कालानुपूर्व्या विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥** *(वेदाङ्गज्योतिषम्, श्लो.-३६)*

भारतीये धर्मशास्त्रे कर्मणः विभागद्वयं कृतं वर्तते इष्टकर्म पूर्त्तकर्म चेति। वाटिकारामादिकं कर्म पूर्त्तकर्मसु अन्तर्भवति –
**इष्टापूर्त्तं द्विजातीनां प्रथमं धर्म्मसाधनम्।**
**इष्टेन लभते स्वर्गं पूर्त्ते मोक्षञ्च विन्दति॥**
**वापीकूपतडागानि देवतायतनानि च।**
**पतितान्युद्धरेद्यस्तु स पूर्त्तफलमश्नुते॥** *(वराहपुराणम्, १७२/३६-३७)*

## वाटिका आरामः च

वेष्ट्यते प्राचीरादिभिः इति वाटिका। सामान्यतया एकस्मिन् सुनिश्चिते संरक्षिते च परिसरे अनेकविधानां पादपानां रोपणेन सिद्धं क्षेत्रं वाटिका कथ्यते। वाटिकायाः अनेके प्रकाराः भवन्ति यथा - पुष्पवाटिका, ओषधिवाटिका, शाकवाटिका इति। एवमेव यत्र उन्नतस्वभावानां फलवतां छायावतां च पादपानां रोपणं क्रियते मध्याह्नकालः आनन्देन यापयितुं शक्यते, तत्क्षेत्रम् आरामः अथवा उपवनम् इति कथ्यते 'आरम्यते अत्र इति - आरामः'।

## पादपानां रोपणार्थम् उचितकालस्य आवश्यकता

वाटिकायाः अथवा आरामस्य विधानं वनस्पति-वानस्पत्य-गुल्म-लतादिरूपैः अनेकविधैः वामनैः उन्नतैः वा पादपैः क्रियते। विभिन्नानां पादपानाम् अथवा तदर्थं बीजानां रोपणस्य पृथक् पृथक् कालः विहितः वर्तते। यथा प्रत्येकं कार्यस्य कश्चन सुनिश्चितः समयः भवति, असमये कृतस्य कार्यस्य अपेक्षितः परिणामः न लभ्यते, तद्वदेव असमये रोपितस्य पादपस्य अपि अपेक्षितः परिणामः न लभ्यते। पादपानां रोपणस्य सुनिश्चितः कालः निर्दिष्टः वर्तते। वाटिकाविधाने विशेषरूपेण चान्द्रकालमानस्य एवञ्च सौरमानस्य प्रयोगाः दृश्यन्ते। यद्यपि क्वचित् नाक्षत्रकालमानस्य सावनकाल-मानस्य च प्रयोगः अपि दृश्यते। एतानि कालमानानि कानि एतेषां ज्ञानं कथं भवति इति आदौ ज्ञात्वा, वाटिकाविधाने एतेषाम् उपयोगिताम् अवगन्तुं शक्नुमः।

## सौर-कालमानम्

सूर्यः प्रायेण त्रिंशता दिनेन एकराशितः अपरराशिं प्रति सङ्क्रामति (आधुनिकखगोलीयगणनया पृथिवी सूर्यस्य परिक्रमणं करोति, तदा पृथिव्याः एकराशितः अपरराशिं प्रति गमनम् इति अवगन्तुं शक्यते)। सूर्यस्य अथवा पृथिव्याः राशिसङ्क्रमणेन एव ऋतुविभागः अयनविभागः च भवतः। तत्र सूर्याधारेण गणनां कुर्मश्चेत् – "सूर्यः यदा मीन-मेषयोः भवति तदा वसन्त-ऋतुः, यदा वृष-मिथुनयोः भवति तदा ग्रीष्मर्तुः, यदा कर्क-सिंहयोः भवति तदा वर्षाऋतुः, यदा कन्या-तुलयोः भवति तदा शरदृतुः, यदा वृश्चिक-धन्वोः भवति तदा हेमन्तर्तुः, यदा मकर-कुम्भयोः भवति तदा शिशिरर्तुः" इत्यनेन प्रकारेण ऋतूनां विभागः कृतः वर्तते। सूर्यः मेषसङ्क्रान्तेः आरभ्य कन्याराशिपर्यन्तम् उत्तरगोलार्धे भवति, एवञ्च तुलाराशेः आरभ्य मीनपर्यन्तं दक्षिणगोलार्धे भवति। स्वक्रान्तिवृत्ते परिभ्रमतः सूर्यस्य मकरादितः मिथुनान्तं यावदुत्तरायणं भवति, एवञ्च कर्कादितः धन्वन्तं यावद्दक्षिणायनं भवति।

एतेषाम् अयन-गोल-ऋतूनां कालविभागानां प्रभावं पर्यावरणे वयम् अनुभवाम एव। उद्यानविशेषज्ञाः किञ्च कृषका अपि ऋत्वादीनाम् आधारेण एव पादपानां रोपणं बीजाधानीनां निर्माणादिकं च कुर्वन्ति इति लोके दृश्यते अपि।

## चान्द्रमानम्

चन्द्रमसः आधारेण यस्य कालमानस्य गणना क्रियते, तत् चान्द्रमानम् इति कथ्यते। स्वपथि (विमण्डलवृत्ते) भ्रमन् चन्द्रमाः यावता कालेन सूर्यात् द्वादशांशं दूरे गच्छति, सः कालः एका तिथिः इति कथ्यते। अनेन प्रकारेण प्रायेण पञ्चदश दिनेषु चन्द्रमाः सूर्यात् $180^0$ दूरे भवति, तदा सः पूर्णगोलाकारः पूर्णप्रकाशयुक्तः च दृश्यते, सा तिथिः पूर्णिमा इति कथ्यते। पूर्णिमातिथौ चन्द्रमा यस्य नक्षत्रस्य सम्मुखे भवति, तेन आधारेण एव चान्द्रमासस्य नाम कथ्यते। चन्द्रमाः यस्यां पूर्णिमायां चित्रायाः सम्मुखे भवति, तात्कालिकः मासः चैत्रः, यस्यां पूर्णिमायां विशाखानक्षत्रे भवति सः वैशाखमासः, यस्यां पूर्णिमाया ज्येष्ठानक्षत्रे भवति तदा ज्येष्ठमासः, यदा आषाढायां (पूर्वाषाढोत्तराषाढयोः) भवति तदा आषाढः, यदा श्रवणे भवति तदा श्रावणः, यदा भाद्रपदायां (पूर्वोत्तराभाद्रपदयोः) भवति तदा भाद्रपदः, यदा अश्विन्यां भवति तदा आश्विनः, यदा कृत्तिकायां भवति तदा कार्त्तिकः, यस्यां पूर्णिमायां चन्द्रमाः मृगशिरसि भवति सः मार्गशीर्षमासः, यस्यां पूर्णिमायां चन्द्रमाः पुष्यनक्षत्रे भवति सः पौषमासः, यस्यां पूर्णिमायां मघानक्षत्रे भवति सः माघमासः, यस्यां पूर्णिमायां फाल्गुनीनक्षत्रयोः (पुर्वोत्तराफाल्गुन्योः) क्वचित् भवति तदा फाल्गुनमासः इत्येवं प्रकारेण चान्द्रमासानां बोधः भवति। यदा स्वविमण्डलवृत्ते भ्रमन् चन्द्रमाः एकं परिक्रमणं कृत्वा पुनः सूर्यसम्मुखे गच्छति, तदा अमावस्या भवति। अनेन प्रकारेण एकस्मात् अमावश्यान्तात् आरभ्य अग्रिमम् अमावश्यान्तं यावत् एकः चान्द्रमासः भवति।

वाटिकाविधाने ऋतु-अयन-गोल-मासानाम् अवधानम् अत्यधिकम् आवश्यकं भवति। यतो हि वाटिकासु विविधपादपानां रोपणस्य कालः पृथक् पृथक् भवति, केचन पादपाः घर्मं सहन्ते, ते उष्णकाले रोपणीयाः भवन्ति, केचन घर्मं न सहन्ते, परन्तु शीतसहाः भवन्ति, तेषां रोपणं शीतकाले करणीयं, केचन पादपाः वृष्टिजलम् अधिकाम् आर्द्रतां वा इच्छन्ति, ते वर्षाकाले रोपणीयाः भवन्ति।

बृहत्संहिताग्रन्थे आचार्येण वराहमिहिरेण वर्णितमस्ति यत् 'येषां पादपानां शाखा न जाता अस्ति, ते पादपाः शिशिर-ऋतौ रोपणीयाः भवन्ति । येषां पादपानां शाखाः जाताः सन्ति ते हेमन्ते रोपणीयाः भवन्ति एवञ्च ये पादपाः स्कन्धादिभिः सुपुष्टाः किञ्चित् उन्नताः जाताः तेषां रोपणं वर्षारम्भे एव करणीयम् इति' । तद्यथा -

**अजातशाखान् शिशिरे जातशाखान् हिमागमे ।**
**वर्षागमे च सुस्कन्धान् यथादिक्स्थान् प्रोपयेत् ।।** *(बृहत्संहिता, ५४/६)*

वृक्षायुर्वेदकारः मासाधारेण विभिन्नपादपानां रोपणस्य विधानं करोति, तदेवम् -

**श्रावणे क्षीरिकाचूतदाडिमीबकुलादिकम् ।**
**भाद्रे च राजकोशाम्रलकुचादि वपेद्बुधः ।।** *(वृक्षायुर्वेदः, श्लो.-८७)*

अर्थात् – क्षीरिकायाः आम्रस्य दाडिमस्य बकुलस्य च रोपणं श्रावणमासे करणीयम्, राजाम्रस्य कोशाम्रस्य लकुचादीनां च रोपणं भाद्रपद्-मासे करणीयम् ।

### शाकवाटिकायां सन्दर्भे निर्दिष्टं वर्तते यत् ,

**आश्विने गोलवार्त्ताकप्रभृतीनि च कार्तिके ।**
**फणिज्जशतपत्रीका धान्यकं मूलकादिकम् ।।**
**फाल्गुने च पटोलादि चैत्रे कार्कारुकादिकम् ।**
**रोपयेत् कदलीकादि सुधीर्वैशाखशुक्रयोः ।।**
**आषाढे निर्व्वपेत् सर्वान् रोपयेच्च प्रकामतः ।**
**सहः सहस्यौ माघश्च वपनादौ विगर्हितः ।।** *(वृक्षायुर्वेदः, श्लो.-८८-९०)*

पटोलादीनां लतानां रोपणं फाल्गुने मासे कर्तव्यम्, कार्कार्वादीनां लतानां बीजानि चैत्रमासे रोपणीयानि, कदल्यादीनां रोपणं वैशाख-ज्येष्ठमासयोः कर्तुं शक्यते, आषाढे तु सर्वेषां पादपानां रोपणं कर्तुं शक्यते । परन्तु मार्गशीर्षे पौषमासे माघमासे च एतेषु त्रिषु मासेषु येषां वपनं क्रियते, तेषां पादपानां समुचितः विकासः न भवति, अतः एतेषु त्रिषु मासेषु बीजवपनम् अथवा पादपरोपणादिकं न करणीयम् इति ।

पादपानां रोपणसन्दर्भे इतोऽपि निर्दिष्टं वर्तते यत्, यदा चन्द्रमाः रोहिणी, मृगशिरा, उत्तराफाल्गुनी, हस्तः, चित्रा, विशाखा अनुराधा, उत्तराषाढा, श्रवणः धनिष्ठा उत्तराभाद्रपद्, अनुराधा रेवती इति एतेषु नक्षत्रेषु सञ्चरति तदा पादपरोपणं सम्यक् भवति इति।

**ध्रुवमृदुमूलविशाखागुरुभं श्रवणस्तथाश्विनी हस्तः ।**
**उक्तानि दिव्यदृग्भिः पादपसंरोपणे भानि ।।** *(बृहत्संहिता, ५५/३१)*

पादपानां रोपणस्य अपेक्षया इतोऽपि महत्त्वपूर्णम् अस्ति तेषां सेचनम् उर्वरकादिदानं एवञ्च अभीष्टे पादपे पुष्पफलादिकं कदा आयाति इत्यस्य ज्ञानम् । एतानि सर्वाण्यपि कार्याणि कालाधीनानि भवन्ति । एकः उद्यानपालकः यदि कालस्य ज्ञाता अस्ति, तर्हि सः पादपानां सेचनं तन्मूले उर्वरकादिदानं च समयेन कर्तुमर्हति, तथैव पुष्प-फलादेः समयं ज्ञात्वा तदाधारेण पूर्वमेव वाटिकाविधौ उक्तानां कीटनाशक-फलवर्धकादीनाम् औषधानां प्रयोगेण पादपानां संरक्षणं संवर्धनं च सम्यक् रूपेण कर्तुम् अर्हति । कालस्य स्पष्टज्ञानं तु ज्योतिषशास्त्राधारितं भवति इति ।

**सन्दर्भग्रन्थाः** –

१. सुरपालः, **वृक्षायुर्वेदः,** सम्पादकः - डॉ. श्रीकृष्णः 'जुगनू', चौखम्बा संस्कृत सीरीज आफिस वाराणसी – २०१८

२. वराहमिहिरः, **बृहत्संहिता,** सम्पादकः – द्विवेदी डॉ. कृष्णचन्द्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी - १९९७

३. Holay Prabhakar Vyankatesh (Author), **Vedic Astronomy,** लगधमुनिविरचितं **वेदाङ्गज्योतिषम्, (पीडिएफ),** Shri Babasaheb Apte Samitee, Apte Bhavan Mahal, Nagpur, १९८९

४. **ब्रह्माण्डपुराणम्,** https://sa.m.wikisource.org